पातञ्जलयोगदर्शनम्

PĀTAÑJALAYOGADARŚANAM

Text with chant-notation in Sanskrit and Roman script

and

ĀDIŚEṢĀṢṬAKAM of Sri. T. Krishnamacharya



KRISHNAMACHARYA YOGA MANDIRAM

13, 4th Cross Street, R.K. Nagar, Chennai - 600 028.

First Edition : April 1985
Second Print : September 1996
Third Print : January 1999
Fourth Print : February 2001
Fifth Print : January 2004
Sixth Print : July 2005
Seventh Print : June 2006

Manuscript Preparation :

A.V. Balasubramanian

T.K.V. Desikachar

R. Prabhakar

R. Sriram

Cover Design :

A Lalitha

Published by:
KRISHNAMACHARYA YOGA MANDIRAM
31, IV Cross Street, R.K. Nagar,
Chennai - 600 028. INDIA.

Printed by:
Vignesha Printers,
Chennai - 600 005.
Phone : 2466 0396 / 2841 9352

PREFACE

There has been an increasing interest in the understanding and the recitation of this great masterpiece of Patañjali. While the former can be achieved through teachers and books, the recitation needs some help in the form of notation. This is what this publication is meant for. Here we have attempted to faithfully render the sūtras according to the incantations we have received from our teacher. But we have split the sūtras to some extent, to make it simpler for the beginner. However, to maintain consistency between the recitation of the sūtras as a whole and this version, we have taken certain liberties. I hope this will be excused. The sūtras have also been presented in the transliterated form to cater to the interests of those not familiar with the Sanskrit script.

Along with the yogasūtras, we have included a recent composition of our teacher Sri T Krishnamacharya, known as ādiśeṣāṣṭakam. This composition was conceived and dictated by him last October.

Each of these stanzas ends with the ādiśeṣaṣaḍakṣarī, the mantra meant to invoke the blessing of ādiśeṣa, who descended in the form of Patañjali and gave us the yogadarśana, the mahābhāṣya and the carakasaṁhitā.

Madras
March, 1985 T.K.V. DESIKACHAR

PRONUNCIATION GUIDE

I. '-' Hyphen denotes a pause during recitation.

II. There are three accents (svaras) or levels of pitch that fall on the vowels. They are called

1.	Svarita	– indicated by the absence of any markings. This is the prime or reference note.
2.	Udātta	– indicated by a vertical line over the syllable. This has a pitch that is above the reference note.
3.	Anudātta	– indicated by a horizontal under-line. This has a pitch that is below the reference note.

III. **Pronunciation guide for the transliteration**

Guttural (pronounced from throat)

Vowels	a	as in but
	ā	as in father
plain	k	as in kin
	g	as in good
aspirate	kh	as in sinkhole
	gh	as in leghorn
	h	as in hand
nasal	ṅ	as in encore

Palatal (pronounced from palate)

Vowels	i	as in tin
	ī	as in teeth
plain	c	as in church
	j	as in judge
aspirate	ch	as in coachhorse
	jh	as in hedgehog
semi-vowel	y	as in you
sibilant	ś	as in sure

Retroflex (pronounced with tip of tongue curled up)

vowels	ṛ	as in sabre
	ṝ	as in chagrin
plain	ṭ	as in cart
	ḍ	as in ardent
aspirate	ṭh	as in carthorse
	ḍh	as in fordham
nasal	ṇ	as in friend
semi-vowel	r	as in rib
sibilant	ṣ	as in hush

Dental (pronounced with tip of tongue against upper teeth)

vowels	ḷ	as in able
	ḹ	(is rare)
plain	t	as in theatre
	d	as in they
aspirate	th	as in withheld
	dh	buddha
nasal	n	as in boon

semi-vowel	l	as in lip
sibilant	s	as in sun

Labial (pronounced with lips)

Vowel	u	as in bull
	ū	as in rule
plain	p	as in pat
	b	as in bee
aspirate	ph	as in uphill
	bh	as in abhor
nasal	m	as in man

Guttural and Palatal

Vowels	e	as in prey
	ai	as in aisle

Guttural and Labial

Vowels	o	as in go
	au	as in cow

Dental and Labial

Semi-vowel	v	as in van

Nasal

ṁ or ṅ makes preceding vowel nasal

Aspirate

ḥ makes preceding vowel aspirate

आदिशेषाष्टकम्

नित्यशय्या श्रीपतेर्यः आदिशेष इति श्रुतः
फणासहस्रमूर्धा च शङ्खचक्रगदाऽसिधृत् ।
हस्तैश्चतुर्भिः श्रीकान्तनित्यकैंकर्यदीक्षितः
भातु मे हृदये नित्यं नागराजो महाद्युतिः ॥

१ जगज्जन्मस्थितिलयान् कुर्वन् श्रीरमया सह ।
यस्मिन् शेते मोदमानस्तस्मै शेषाय ओ३म् नमः ॥

२. प्राणान् सप्तगतीन्यस्तु सप्तप्राकारमातनोत् ।
श्रीशमण्टपनिर्माणे तस्मै शेषाय ओ३म् नमः ॥

३ स्वस्वामिसेवाकरणे अपवर्णनिवारकम् ।
ततान यो महाभाष्यं तस्मै शेषाय ओ३म् नमः ॥

४. स्वफणामण्डलं यो वै भूषाच्छत्रं चकारह ।
स्वामिने स्वस्य मधुरं तस्मै शेषाय ओ३म् नमः ॥

५ आदिः किंकरकूटानां पराराधनरूपिणाम् ।
आदिशेष इति ख्यातस्तस्मै शेषाय ओ३म् नमः ॥

ĀDIŚEṢĀṢṬAKAM

nityaśayyā śrīpateryaḥ ādiśeṣa iti śrutaḥ

phaṇāsahasramūrdhā ca śaṅkhacakragadāʃsidhṛt |

hastaiścaturbhiḥ śrīkāntanityakaiṁkaryadīkśitaḥ

bhātu me hṛdaye nityaṁ nāgarājo mahādyutiḥ ||

1 jagajjanmasthitilayān kurvan śrīramayā saha |

yasmin śete modamānastasmai śeṣāya o3m namaḥ ||

2 prāṇān saptagatīnyastu saptaprākāramātanot |

śrīsamaṇṭapanirmāṇe tasmai śeṣāya o3m namaḥ ||

3 svasvāmisevākaraṇe apavarṇanivārakam |

tatāna yo mahābhāṣyaṁ tasmai śeṣāya o3m namaḥ ||

4 svaphaṇāmaṇḍalaṁ yo vai bhūṣācchatraṁ cakāraha |

svāmine svasya madhuraṁ tasmai śeṣāya o3m namaḥ ||

5 ādiḥ kiṁkarakūṭānāṁ parārādhanarūpiṇām |

ādiśeṣa iti khyātastasmai śeṣāya o3m namaḥ ||

६ श्रीशसेवाभिवृद्ध्यर्थं गात्रचित्तविशोधकम् ।
अष्टाङ्गयोगं तेनेयस्तस्मै शेषाय ओ३म् नमः ॥

७ स्वतो भास्वत्स्वरूपस्य शेष कैंकर्यरूपकम् ।
चक्रे फणामणिज्योति तस्मै शेषाय ओ३म् नमः ॥

८ मृदुलं धवलं चाल्पशीतलं विस्तृतं तथा ।
आसनं पुच्छविन्यासात् तस्मै शेषाय ओ३म् नमः ॥

आदिशेषाष्टकमिदं कृष्णयोगिकृतं मुदे ।
शायिनो आदिशेषे हि भवत्विति कृताञ्जलिः ॥

श्री आदिशेषशायिने रङ्गनाथाय नमो नमः ।

6 śrīśasevābhivṛddhyarthaṁ gātracittaviśodhakam |
aṣṭāṅgayogaṁ teneyastasmai śeṣāya o3m namaḥ ||

7 svato bhāsvatsvarūpasya śeṣa kaiṁkaryarūpakam |
cakre phaṇāmaṇijyoti tasmai śeṣāya o3m namaḥ ||

8 mṛdulaṁ dhavalaṁ cālpaśītalaṁ vistṛtaṁ tathā |
āsanaṁ pucchavinyāsāt tasmai śeṣāya o3m namaḥ ||

ādiśeṣāṣṭakamidaṁ kṛṣṇayogikṛtaṁ mude |
śāyino ādiśeṣe hi bhavatviti kṛtāñjaliḥ ||

śrī ādiśeṣaśāyine raṅganāthāya namo namaḥ |

ĀDIŚEṢĀṢṬAKAM

Dhyānaśloka

Known as Ādiśeṣa, having one thousand heads and four hands each holding a conch, a disc, a mace and a sword, he is the couch for Srīpati. He is eternally absorbed in the service of the Lord Srikānta. Let this resplendent king of the serpents reveal himself to me in my heart.

Adiśeṣāṣṭakam

1. Salutations to Śeṣa ! on whom the great creator happily rests.
2. Salutations to Śeṣa ! whose breath moving in seven ways became the seven forts of the great temple of Raṅganātha.
3. Salutations to Śeṣa ! who composed the mahābhaṣya to help remove errors in words used for the service of the Lord.
4. Salutations to Śeṣa ! whose beautiful hood forms the umbrella for the Lord.

5. Salutations to Śeṣa ! who is the first among the servants of the Lord and therefore known as ādiśeṣa.

6. Salutations to Śeṣa ! who revived the aṣṭāṅgayoga to cleanse the body and mind and make it stronger to serve the Lord.

7. Salutations to Śeṣa ! who hoods bear gems that glows like offerings to the self-resplendent Lord.

8. Salutations to Śeṣa ! whose soft, pure and cool body extends and forms a comfortable seat for the Lord to rest.

These verses known as ādiśeṣāṣṭaka are composed by Yogi Kṛṣṇa and are offered humbly to please the Lord resting on ādiśeṣā.

Salutations to Lord Raṅganātha resting on ādiśeṣā !

I. समाधिपादः

I-1 अथ - योगानुशासनम् ।

I-2 योगः - चित्तवृत्तिनिरोधः ।

I-3 तदा - द्रष्टुः - स्वरूपे - अवस्थानम् ।

I-4 वृत्तिसारूप्यम् - इतरत्र ।

I-5 वृत्तयः पञ्चतय्यः - क्लिष्टाक्लिष्टाः ।

I-6 प्रमाण - विपर्यय - विकल्प - निद्रा -
स्मृतयः ।

I-7 प्रत्यक्ष - अनुमान - आगमाः - प्रमाणानि ।

I-8 विपर्ययो - मिथ्याज्ञानम् -
अतद्रूपप्रतिष्ठम् ।

I-9 शब्दज्ञानानुपाती - वस्तुशून्यो - विकल्पः ।

I-10 अभावप्रत्ययालम्बना - तमोवृत्तिर्निद्रा ।

I-11 अनुभूतविषय - असंप्रमोषः - स्मृतिः ।

I. Samādhipādaḥ

I-1. atha - yogānuśāsanam

I-2. yogaḥ - cittavṛttinirodhaḥ

I-3. tadā - draṣṭuḥ - svarūpe - avasthānam

I-4. vṛttisārūpyam - itaratra

I-5. vṛttayaḥ pañcatayyaḥ - kliṣṭākliṣṭāḥ

I-6. pramāṇa - viparyaya - vikalpa - nidrā - smṛtayaḥ

I-7. pratyakṣa - anumāna - āgamāḥ - pramāṇāni

I-8. viparyayo - mithyājñānam - atadrūpapratiṣṭham

I-9. śabdajñānānupātī - vastuśūnyo - vikalpaḥ

I-10. abhāvapratyayālambanā - tamovṛttirnidrā

I-11. anubhūtaviṣaya - asaṁpramoṣaḥ - smṛtiḥ

I-12 अभ्यासवैराग्याभ्यां - तन्निरोधः ।

I-13 तत्र स्थितौ - यत्नोऽभ्यासः ।

I-14 स तु - दीर्घकाल - नैरन्तर्य - सत्कार -
आदरा - आसेवितो - दृढभूमिः ।

I-15 दृष्टानुश्रविक - विषयवितृष्णस्य -
वशीकारसंज्ञा - वैराग्यम् ।

I-16 तत्परं - पुरुषख्यातेः - गुणवैतृष्ण्यम् ।

I-17 वितर्क - विचार - आनन्द - अस्मितारूप -
अनुगमात् - संप्रज्ञातः ।

I-18 विरामप्रत्यय - अभ्यासपूर्वः -
संस्कारशेषः - अन्यः ।

I-19 भवप्रत्ययो - विदेहप्रकृतिलयानाम् ।

I-20 श्रद्धा - वीर्य - स्मृति - समाधिप्रज्ञा -
पूर्वक इतरेषाम् ।

I-12. abhyāsavairāgyābhyāṁ - tannirodhaḥ

I-13. tatra sthitau - yatno'bhyāsaḥ

I-14. sa tu - dīrghakāla - nairantarya - satkāra -
ādarā - āsevito - dṛḍhabhūmiḥ

I-15. dṛṣṭānuśravika - viṣayavitṛṣṇasya -
vaśīkārasaṁjñā - vairāgyam

I-16. tatparaṁ - puruṣakhyāteḥ - guṇavaitṛṣṇyam

I-17. vitarka - vicāra - ānanda - asmitārūpa -
anugamāt - saṁprajñātaḥ

I-18. virāmapratyaya - abhyāsapūrvaḥ -
saṁskāraśeṣaḥ - anyaḥ

I-19. bhavapratyayo - videhaprakṛtilayānām

I-20. śraddhā - vīrya - smṛti - samādhiprajñā -
pūrvaka itareṣām

I-21 तीव्रसंवेगानाम् - आसन्नः ।

I-22 मृदु - मध्य - अधिमात्रत्वात् - ततोऽपि -
विशेषः ।

I-23 ईश्वर - प्रणिधानाद्वा ।

I-24 क्लेश - कर्म - विपाक - आशयैः -
अपरामृष्टः - पुरुषविशेष ईश्वरः ।

I-25 तत्र - निरतिशयं - सर्वज्ञबीजम् ।

I-26 स एष - पूर्वेषामपि गुरुः -
कालेनानवच्छेदात् ।

I-27 तस्य - वाचकः - प्रणवः ।

I-28 तज्जपः - तदर्थभावनम् ।

I-29 ततः - प्रत्यक्चेतनाधिगमः - अपि -
अन्तरायाभावश्च ।

I-21. tīvrasaṁvegānām - āsannaḥ

I-22. mṛdu - madhya - adhimātratvāt - tato'pi -
viśeṣaḥ

I-23. īśvara - praṇidhānādvā

I-24. kleśa - karma - vipāka - āśayaiḥ -
aparāmṛṣṭaḥ - puruṣaviśeṣa īśvaraḥ

I-25. tatra - niratiśayaṁ - sarvajñabījam

I-26. sa eṣa - pūrveṣāmapi guruḥ -
kālenānavacchedāt

I-27. tasya - vācakaḥ - praṇavaḥ

I-28. tajjapaḥ - tadarthabhāvanam

I-29. tataḥ - pratyakcetanādhigamaḥ - api -
antarāyābhāvaśca

I-30 व्याधि - स्त्यान - संशय - प्रमाद - आलस्य -

अविरति - भ्रान्तिदर्शन - अलब्धभूमिकत्व -

अनवस्थितत्वानि - चित्तविक्षेपाः - ते -

अन्तरायाः ।

I-31 दुःख - दौर्मनस्य - अङ्गमेजयत्व -

श्वासप्रश्वासाः - विक्षेपसहभुवः ।

I-32 तत्प्रतिषेधार्थम् - एकतत्त्वाभ्यासः ।

I-33 मैत्रीकरुणा - मुदितोपेक्षाणां -

सुखदुःख - पुण्यापुण्यविषयाणां -

भावनातः - चित्तप्रसादनम् ।

I-34 प्रच्छर्दन - विधारणाभ्यां - वा -

प्राणस्य ।

I-35 विषयवती वा - प्रवृत्तिरुत्पन्ना - मनसः -

स्थिति - निबन्धिनी ।

I-30. vyādhi - styāna - saṁśaya - pramāda - ālasya-

avirati - bhrāntidarśana - alabdhabhūmikatva-

anavasthitatvāni - cittavikṣepāḥ - te -

antarāyāḥ

I-31. duḥkha - daurmanasya - aṅgamejayatva -

śvāsapraśvāsāḥ - vikṣepasahabhuvaḥ

I-32. tatpratiṣedhārtham - ekatattvābhyāsaḥ

I-33. maitrīkaruṇā - muditopekṣāṇāṁ -

sukhaduḥkha - puṇyāpuṇyaviṣayāṇām -

bhāvanātaḥ - cittaprasādanam

I-34. pracchardana - vidhāraṇābhyāṁ - vā -

prāṇasya

I-35. viṣayavatī vā - pravṛttirutpannā - manasaḥ -

sthiti - nibandhinī

I-36 विशोका वा - ज्योतिष्मती ।

I-37 वीतरागविषयं वा - चित्तम् ।

I-38 स्वप्ननिद्रा - ज्ञानालम्बनं वा ।

I-39 यथाभिमत - ध्यानाद्वा ।

I-40 परमाणु - परममहत्त्वान्तः -
अस्य वशीकारः ।

I-41 क्षीणवृत्तेः - अभिजातस्येव मणेः - ग्रहीतृ -
ग्रहण - ग्राह्येषु - तत्स्थ-तदञ्जनता -
समापत्तिः ।

I-42 तत्र - शब्दार्थज्ञानविकल्पैः - संकीर्णा -
सवितर्का - समापत्ति ः ।

I-43 स्मृतिपरिशुद्धौ - स्वरूपशून्येव -
अर्थमात्रनिर्भासा - निर्वितर्का ।

I-36. viśokā vā - jyotiṣmatī

I-37. vītarāgaviṣayaṁ vā - cittam

I-38. svapnanidrā - jñānālambanaṁ vā

I-39. yathābhimata - dhyānādvā

I-40. paramāṇu - paramamahattvāntaḥ - asya vaśīkāraḥ

I-41. kṣīṇavṛtteḥ - abhijātasyeva maṇeḥ - grahītṛ- grahaṇa - grāhyeṣu - tatstha tadañjanatā- samāpattiḥ

I-42. tatra - śabdārthajñānavikalpaiḥ - saṅkīrṇā - savitarkā - samāpattiḥ

I-43. smṛtipariśuddhau - svarūpaśūnyeva - arthamātranirbhāsā - nirvitarkā

I-44 एतयैव - सविचारा – निर्विचारा च -
सूक्ष्मविषया - व्याख्याता ।

I-45 सूक्ष्मविषयत्वं च - अलिङ्गपर्यवसानम् ।

I-46 ता एव - सबीजः समाधिः ।

I-47 निर्विचारवैशारद्ये - अध्यात्मप्रसादः ।

I-48 ऋतंभरा - तत्र प्रज्ञा ।

I-49 श्रुतानुमानप्रज्ञाभ्याम् - अन्यविषया -
विशेषार्थत्वात् ।

I-50 तज्जः संस्कारः - अन्यसंस्कारप्रतिबन्धी ।

I-51 तस्यापि निरोधे - सर्वनिरोधात् -
निर्बीजः समाधिः ।

I-44. etayaiva - savicārā - nirvicārā ca-
sūkṣmaviṣayā-vyākhyātā

I-45. sūkṣmaviṣayatvaṁ ca - aliṅgaparyavasānam

I-46. tā eva - sabījaḥ samādhiḥ

I-47. nirvicāravaiśāradye - adhyātmaprasādaḥ

I-48. ṛtaṁbharā - tatra prajñā

I-49. śrutānumānaprajñābhyām - anyaviṣayā -
viśeṣārthatvāt

I-50. tajjaḥ saṁskāraḥ - anyasaṁskārapratibandhī

I-51. tasyāpi nirodhe - sarvanirodhāt -
nirbījaḥ samādhiḥ

II. साधनपादः

II-1 तपः - स्वाध्याय - ईश्वरप्रणिधानानि - क्रियायोगः ।

II-2 समाधिभावनार्थः - क्लेश-तनूकरणार्थश्च ।

II-3 अविद्या - अस्मिता - राग - द्वेष - अभिनिवेशाः - क्लेशाः ।

II-4 अविद्या क्षेत्रम् - उत्तरेषां - प्रसुप्त - तनु - विच्छिन्न - उदाराणाम् ।

II-5 अनित्य - अशुचि - दुःख - अनात्मसु - नित्य - शुचि - सुख - आत्मख्यातिः - अविद्या ।

II-6 दृग्दर्शनशक्त्योः - एकात्मता - इव - अस्मिता ।

II-7 सुखानुशयी - रागः ।

II-8 दुःखानुशयी - द्वेषः ।

II. Sādhanapādaḥ

II-1. tapaḥ - svādhyāya - īśvarapraṇidhānāni - kriyāyogaḥ

II-2. samādhibhāvanārthaḥ - kleśa - tanūkaraṇārthaśca

II-3. avidyā - asmitā - rāga - dveṣa - abhiniveśāḥ - kleśāḥ

II-4. avidyā kṣetram - uttareṣām - prasupta - tanu - vicchinna - udārāṇām

II-5. anitya - aśuci - duḥkha - anātmasu - nitya - śuci - sukha - ātmakhyātiḥ - avidyā

II-6. dṛkdarśanaśaktyoḥ - ekātmatā - iva - asmitā

II-7. sukhānuśayī - rāgaḥ

II-8. duḥkhānuśayī - dveṣaḥ

II-9 स्वरसवाही - विदुषोऽपि - समारूढः -
अभिनिवेशः ।

II-10 ते - प्रतिप्रसवहेयाः - सूक्ष्माः ।

II-11 ध्यानहेयाः तद्वृत्तयः ।

II-12 क्लेशमूलः - कर्माशयो - दृष्टादृष्टजन्म -
वेदनीयः ।

II-13 सतिमूले - तद्विपाको - जात्यायुर्भोगाः ।

II-14 ते - ह्लादपरितापफलाः -
पुण्यापुण्यहेतुत्वात् ।

II-15 परिणाम - ताप - संस्कारदुःखैः -
गुणवृत्तिविरोधाच्च - दुःखमेव सर्वं -
विवेकिनः ।

II-16 हेयं - दुःखमनागतम् ।

II-17 द्रष्टृदृश्ययोः-संयोगो - हेयहेतुः ।

II-9. svarasavāhī - viduṣo'pi - samārūḍhaḥ - abhiniveśaḥ

II-10. te - pratiprasavaheyāḥ - sūkṣmāḥ

II-11. dhyānaheyāḥ - tadvṛttayaḥ

II-12. kleśamūlaḥ - karmāśayo - dṛṣṭādṛṣṭajanma - vedanīyaḥ

II-13. satimūle - tadvipāko - jātyāyurbhogāḥ

II-14. te - hlādaparitāpaphalāḥ - puṇyāpuṇyahetutvāt

II-15. pariṇāma - tāpa - saṁskāraduḥkhaiḥ - guṇavṛttivirodhācca - duḥkhameva sarvaṁ - vivekinaḥ

II-16. heyaṁ - duḥkhamanāgatam

II-17. draṣṭṛdṛśyayoḥ - saṁyogo - heyahetuḥ

II-18 प्रकाशक्रियास्थितिशीलं - भूतेन्द्रियात्मकं -

भोगापवर्गार्थं -दृश्यम् ।

II-19 विशेषाविशेष - लिङ्गमात्रालिङ्गानि - गुणपर्वाणि ।

II-20 द्रष्टा दृशिमात्रः-शुद्धोऽपि -

प्रत्ययानुपश्यः ।

II-21 तदर्थ एव - दृश्यस्य - आत्मा ।

II-22 कृतार्थं - प्रतिनष्टम् - अपि - अनष्टं -

तदन्यसाधारणत्वात् ।

II-23 स्वस्वामिशक्त्योः - स्वरूपोपलब्धिहेतुः -

संयोगः ।

II-24 तस्य हेतुः - अविद्या ।

II-25 तदभावात् - संयोगाभावो - हानं -

तद्दृशेः कैवल्यम् ।

II-26 विवेकख्यातिः - अविप्लवा - हानोपायः ।

II-18. prakāśakriyāsthitiśīlaṁ - bhūtendriyātmakaṁ -
bhogāpavargārthaṁ - dṛśyam

II-19. viśeṣāviśeṣa - liṅgamātrāliṅgāni - guṇaparvāṇi

II-20. draṣṭā dṛśimātraḥ - śuddho'pi -
pratyayānupaśyaḥ

II-21. tadartha eva - dṛśyasya - ātmā

II-22. kṛtārthaṁ - pratinaṣṭam - api - anaṣṭaṁ -
tadanyasādhāraṇatvāt

II-23. svasvāmiśaktyoḥ - svarūpopalabdhihetuḥ -
saṁyogaḥ

II-24. tasya hetuḥ - avidyā

II-25. tadabhāvāt - saṁyogābhāvo - hānaṁ -
taddṛśeḥ kaivalyam

II-26. vivekakhyātiḥ - aviplavā - hānopāyaḥ

II-27 तस्य सप्तधा - प्रान्तभूमिः प्रज्ञा ।

II-28 योगाङ्गानुष्ठानात् - अशुद्धिक्षये -

ज्ञानदीप्तिः - आविवेकख्यातेः ।

II-29 यम - नियम - आसन - प्राणायाम -

प्रत्याहार - धारणा - ध्यान - समाधयः -

अष्टौ - अङ्गानि ।

II-30 अहिंसा - सत्य - अस्तेय - ब्रह्मचर्य -

अपरिग्रहाः - यमाः ।

II-31 जाति - देश - काल - समय - अनवच्छिन्नाः -

सार्वभौमाः - महाव्रतम् ।

II-32 शौच - संतोष - तपः - स्वाध्याय -

ईश्वरप्रणिधानानि - नियमाः ।

II-33 वितर्कबाधने - प्रतिपक्षभावनम् ।

II-27. tasya saptadhā - prāntabhūmiḥ - prajñā

II-28. yogāṅgānuṣṭhānāt - aśuddhikṣaye -
jñānadīptiḥ - āvivekakhyāteḥ

II-29. yama - niyama - āsana - prāṇāyāma -
pratyāhāra - dhāraṇā - dhyāna - samādhayaḥ -
aṣṭau - aṅgāni

II-30. ahiṁsā - satya - asteya - brahmacarya -
aparigrahāḥ - yamāḥ

II-31. jāti - deśa - kāla - samaya - anavacchinnāḥ -
sārvabhaumāḥ - mahāvratam

II-32. śauca - santoṣa - tapaḥ - svādhyāya -
īśvarapraṇidhānāni - niyamāḥ

II-33. vitarkabādhane - pratipakṣabhāvanam

II-34 वितर्काः - हिंसादयः - कृत - कारित -
अनुमोदिताः - लोभ - क्रोध - मोहपूर्वकाः -
मृदु - मध्य - अधिमात्राः - दुःख - अज्ञान -
अनन्तफलाः - इति - प्रतिपक्षभावनम् ।

II-35 अहिंसाप्रतिष्ठायां - तत्सन्निधौ -
वैरत्यागः ।

II-36 सत्यप्रतिष्ठायां - क्रियाफल - आश्रयत्वम् ।

II-37 अस्तेयप्रतिष्ठायां - सर्वरत्न - उपस्थानम् ।

II-38 ब्रह्मचर्यप्रतिष्ठायां - वीर्यलाभः ।

II-39 अपरिग्रहस्थैर्ये - जन्मकथंता -
संबोधः ।

II-40 शौचात् - स्वाङ्गजुगुप्सा - परैरसंसर्गः ।

II-41 सत्त्वशुद्धि - सौमनस्य - ऐकाग्रय -
इन्द्रियजय - आत्मदर्शन - योग्यत्वानि च ।

II-34. vitarkāḥ - hiṁsādayaḥ - kṛta - kārita - anumoditāḥ - lobha - krodha - mohapūrvakāḥ - mṛdu - madhya - adhimātrāḥ - duḥkha - ajñāna - anantaphalāḥ - iti - pratipakṣabhāvanam.

II-35. ahiṁsāpratiṣṭhāyāṁ-tatsannidhau - vairatyāgaḥ

II-36. satyapratiṣṭhāyāṁ - kriyāphala - āśrayatvam

II-37. asteyapratiṣṭhāyāṁ - sarvaratna - upasthānam

II-38. brahmacaryapratiṣṭhāyāṁ - vīryalābhaḥ

II-39. aparigrahasthairye - janmakathaṁtā - saṁbodhaḥ

II-40. śaucāt - svāṅgajugupsā - parairasaṁsargaḥ

II-41. sattvaśuddhi - saumanasya - aikāgrya - indriyajaya - ātmadarśana - yogyatvāni ca

II-42 संतोषात् - अनुत्तमः - सुखलाभः ।

II-43 कायेन्द्रियसिद्धिः - अशुद्धिक्षयात् - तपसः ।

II-44 स्वाध्यायात् - इष्टदेवतासंप्रयोगः ।

II-45 समाधिसिद्धिः - ईश्वरप्रणिधानात् ।

II-46 स्थिरसुखमासनम् ।

II-47 प्रयत्नशैथिल्य - अनन्तसमापत्तिभ्याम् ।

II-48 ततो - द्वंद्वानभिघातः ।

II-49 तस्मिन्सति - श्वासप्रश्वासयोः - गतिविच्छेदः -
प्राणायामः ।

II-50 बाह्य - आभ्यन्तर - स्तम्भवृत्तिः - देश -
काल - संख्याभिः - परिदृष्टो -
दीर्घसूक्ष्मः ।

II-51 बाह्य - आभ्यन्तर - विषयाक्षेपी - चतुर्थः ।

II-42. saṅtoṣāt - anuttamaḥ - sukhalābhaḥ

II-43. kāyendriyasiddhiḥ - aśuddhikṣayāt - tapasaḥ

II-44. svādhyāyāt - iṣṭadevatāsaṁprayogaḥ

II-45. samādhisiddhiḥ - īśvarapraṇidhānāt

II-46. sthirasukhamāsanam

II-47. prayatnaśaithilya - anantasamāpattibhyām

II-48. tato - dvaṅdvānabhighātaḥ

II-49. tasminsati - śvāsapraśvāsayoḥ - gativicchedaḥ - prāṇāyāmaḥ

II-50. bāhya - ābhyantara - stambhavṛttiḥ - deśa - kāla - saṁkhyābhiḥ - paridṛṣṭo - dīrghasūkṣmaḥ

II-51. bāhya - ābhyantara - viṣayākṣepī - caturthaḥ -

II-52 ततः - क्षीयते - प्रकाशावरणम् ।

II-53 धारणासु च - योग्यता मनसः ।

II-54 स्वविषय - असंप्रयोगे - चित्तस्य -

स्वरूपानुकारः इव - इन्द्रियाणां - प्रत्याहारः ।

II-55 ततः - परमा वश्यता - इन्द्रियाणाम् ।

II-52. tataḥ - kṣīyate - prakāśāvaraṇam

II-53. dhāraṇāsu ca - yogyatā manasaḥ

II-54. svaviṣaya - asaṁprayoge - cittasya -
svarūpānukāra iva - indriyāṇāṁ pratyāhāraḥ

II-55. tataḥ - paramā vaśyatā - indriyāṇām

III. विभूतिपादः

III-1 देशबन्धः - चित्तस्य धारणा ।

III-2 तत्र - प्रत्ययैकतानता - ध्यानम् ।

III-3 तदेव - अर्थमात्रनिर्भासं -

स्वरूपशून्यमिव - समाधिः ।

III-4 त्रयमेकत्र - संयमः ।

III-5 तज्जयात् - प्रज्ञालोकः ।

III-6 तस्य भूमिषु - विनियोगः ।

III-7 त्रयमन्तरङ्गं - पूर्वेभ्यः ।

III-8 तदपि बहिरङ्गं - निर्बीजस्य ।

III-9 व्युत्थाननिरोधसंस्कारयोः -

अभिभवप्रादुर्भावौ -

निरोधक्षणचित्तान्वयो - निरोधपरिणामः ।

III-10 तस्य - प्रशान्तवाहिता - संस्कारात् ।

III. Vibhūtipādaḥ

III-1. deśabandhaḥ - cittasya dhāraṇā

III-2. tatra - pratyayaikatānatā - dhyānam

III-3. tadeva - arthamātranirbhāsaṁ -
svarūpaśūnyamiva - samādhiḥ

III-4. trayamekatra - saṁyamaḥ

III-5. tajjayāt - prajñālokaḥ

III-6. tasya bhūmiṣu - viniyogaḥ

III-7. trayamantaraṅgaṁ - pūrvebhyaḥ

III-8. tadapi bahiraṅgaṁ - nirbījasya

III-9. vyutthānanirodhasaṁskārayoḥ -
abhibhavaprādurbhāvau-
nirodhakṣaṇacittānvayo-nirodhapariṇāmaḥ

III-10. tasya - praśāntavāhitā - saṁskārāt

III-11 सर्वार्थतैकाग्रतयोः - क्षयोदयौ - चित्तस्य -

समाधिपरिणामः ।

III-12 ततः-पुनः - शान्तोदितौ - तुल्यप्रत्ययौ -

चित्तस्य - एकाग्रतापरिणामः ।

III-13 एतेन - भूतेन्द्रियेषु - धर्म - लक्षण -

अवस्था - परिणामाः - व्याख्याताः ।

III-14 शान्त - उदित - अव्यपदेश्य - धर्मानुपाती -

धर्मी ।

III-15 क्रमान्यत्वं - परिणामान्यत्वे हेतुः ।

III-16 परिणामत्रयसंयमात् - अतीतानागतज्ञानम् ।

III-17 शब्दार्थप्रत्ययानाम् - इतरेतराध्यासात् -

संकरः - तत्प्रविभागसंयमात् -

सर्वभूतरुतज्ञानम् ।

III-18 संस्कारसाक्षात्करणात् - पूर्वजातिज्ञानम् ।

III-11. sarvārthataikāgratayoḥ - kṣayodayau - cittasya - samādhipariṇāmaḥ

III-12. tataḥ - punaḥ - śāntoditau - tulyapratyayau - cittasya - ekāgratāpariṇāmaḥ

III-13. etena - bhūtendriyeṣu - dharma - lakṣaṇa - avasthā - pariṇāmāḥ - vyākhyātāḥ

III-14. śānta - udita - avyapadeśya - dharmānupātī- dharmī

III-15. kramānyatvaṁ - pariṇāmānyatve hetuḥ

III-16. pariṇāmatrayasaṁyamāt - atītānāgatajñānam

III-17. śabdārthapratyayānām - itaretarādhyāsāt - saṅkaraḥ - tatpravibhāgasaṁyamāt - sarvabhūtarutajñānam

III-18. saṁskārasākṣātkaraṇāt - pūrvajātijñānam

III-19 प्रत्ययस्य - परचित्तज्ञानम् ।

III-20 न च - तत्सालम्बनं - तस्याविषयीभूतत्वात् ।

III-21 कायरूपसंयमात् - तद्ग्राह्यशक्तिस्तम्भे -
चक्षुः - प्रकाशासंप्रयोगे - अन्तर्धानम् ।

III-22 सोपक्रमं - निरुपक्रमं च कर्म -
तत्संयमात् - अपरान्तज्ञानम् - अरिष्टेभ्यो वा ।

III-23 मैत्र्यादिषु - बलानि ।

III-24 बलेषु - हस्तिबलादीनि ।

III-25 प्रवृत्त्यालोकन्यासात् - सूक्ष्म - व्यवहित -
विप्रकृष्टज्ञानम् ।

III-26 भुवनज्ञानं - सूर्ये संयमात् ।

III-27 चन्द्रे - ताराव्यूहज्ञानम् ।

III-28 ध्रुवे - तद्गतिज्ञानम् ।

III-29 नाभिचक्रे - कायव्यूहज्ञानम् ।

III-19. pratyayasya - paracittajñānam

III-20. na ca - tatsālambanaṁ - tasyāviṣayībhūtatvāt

III-21. kāyarūpasaṁyamāt - tadgrāhyaśaktistambhe - cakṣuḥ - prakāśāsaṁprayoge - antardhānam

III-22. sopakramaṁ - nirupakramaṁ ca karma - tatsaṁyamāt - aparāntajñānam - ariṣṭebhyo vā

III-23. maitryādiṣu - balāni

III-24. baleṣu - hastibalādīni

III-25. pravṛttyālokanyāsāt - sūkṣma - vyavahita - viprakṛṣṭajñānam

III-26. bhuvanajñānaṁ - sūrye saṁyamāt

III-27. candre - tārāvyūhajñānam

III-28. dhruve - tadgatijñānam

III-29. nābhicakre - kāyavyūhajñānam

III-30 कण्ठकूपे - क्षुत्पिपासानिवृत्तिः ।

III-31 कूर्मनाड्यां - स्थैर्यम् ।

III-32 मूर्धज्योतिषि - सिद्धदर्शनम् ।

III-33 प्रातिभाद्वा - सर्वम् ।

III-34 हृदये - चित्तसंवित् ।

III-35 सत्त्वपुरुषयोः - अत्यन्तासंकीर्णयोः -
प्रत्ययाविशेषो भोगः - परार्थत्वात् -
स्वार्थसंयमात् - पुरुषज्ञानम् ।

III-36 ततः - प्रातिभ - श्रावण - वेदन - आदर्श -
आस्वादवार्ता - जायन्ते ।

III-37 ते - समाधावुपसर्गाः - व्युत्थाने सिद्धयः ।

III-38 बन्धकारणशैथिल्यात् - प्रचारसंवेदनाच्च -
चित्तस्य - परशरीरावेशः ।

III-30. kaṇṭhakūpe - kṣutpipāsānivṛttiḥ

III-31. kūrmanāḍyāṁ - sthairyam

III-32. mūrdhajyotiṣi - siddhadarśanam

III-33. prātibhādvā - sarvam

III-34. hṛdaye - cittasaṁvit

III-35. sattvapuruṣayoh - atyantāsaṅkīrṇayoḥ-

pratyayāviśeṣo bhogaḥ - parārthatvāt -

svārthasaṁyamāt - puruṣajñānam

III-36. tataḥ - prātibha - śrāvaṇa - vedana - ādarśa -

āsvādavārtā - jāyante

III-37. te - samādhāvupasargāḥ - vyutthāne siddhayaḥ

III-38. bandhakāraṇaśaithilyāt-pracārasaṁvedanācca -

cittasya - paraśarīrāveśaḥ

III-39 उदानजयात् - जल - पङ्क - कण्टकादिषु -

असङ्गः - उत्क्रान्तिश्च ।

III-40 समानजयात् - ज्वलनम् ।

III-41 श्रोत्राकाशयोः - संबन्धसंयमात् -

दिव्यं श्रोत्रम् ।

III-42 कायाकाशयोः - संबन्धसंयमात् -

लघुतूलसमापत्तेश्च - आकाशगमनम् ।

III-43 बहिरकल्पितावृत्तिः - महाविदेहा - ततः -

प्रकाशावरणक्षयः ।

III-44 स्थूल - स्वरूप - सूक्ष्म - अन्वय -

अर्थवत्त्वसंयमात् - भूतजयः ।

III-45 ततोऽणिमादिप्रादुर्भावः - कायसंपत् -

तद्धर्मानभिघातश्च ।

III-39. udānajayāt - jala - paṅka - kaṇṭakādiṣu -

asaṅgaḥ - utkrāntiśca

III-40. samānajayāt - jvalanam

III-41. śrotrākāśayoḥ - saṁbandhasamyamāt -

divyaṁ śrotram

III-42. kāyākāśayoḥ - saṁbandhasaṁyamāt -

laghutūlasamāpatteśca - ākāśagamanam

III-43. bahirakalpitāvṛttiḥ - mahāvidehā - tataḥ -

prakāśāvaraṇakṣayaḥ

III-44. sthūla - svarūpa - sūkṣma - anvaya -

arthavattvasaṁyamāt - bhūtajayaḥ

III-45. tato'ṇimādiprādurbhāvaḥ - kāyasampat -

taddharmānabhighātaśca

4

III-46 रूप - लावण्य - बल - वज्रसंहननत्वानि -

कायसंपत्।

III-47 ग्रहण - स्वरूप - अस्मिता - अन्वय -

अर्थवत्त्वसंयमात् - इन्द्रियजयः।

III-48 ततो मनोजवित्वं - विकरणभावः -

प्रधानजयश्च।

III-49 सत्त्वपुरुष - अन्यताख्यातिमात्रस्य -

सर्वभावाधिष्ठातृत्वं - सर्वज्ञातृत्वं च।

III-50 तद्वैराग्यादपि - दोषबीजक्षये - कैवल्यम्।

III-51 स्थान्युपनिमन्त्रणे - सङ्गस्मयाकरणं -

पुनरनिष्टप्रसङ्गात्।

III-52 क्षणतत्क्रमयोः-संयमात् - विवेकजं -

ज्ञानम्।

III-46. rūpa - lāvaṇya - bala - vajrasaṁhananatvāni - kāyasaṁpat

III-47. grahaṇa - svarūpa - asmitā - anvaya - arthavattvasaṁyamāt - indriyajayaḥ

III-48. tato manojavitvaṁ - vikaraṇabhāvaḥ - pradhānajayaśca

III-49. sattvapuruṣa - anyatākhyātimātrasya - sarvabhāvādhiṣṭhātṛtvaṁ - sarvajñātṛtvaṁ ca

III-50. tadvairāgyādapi - doṣabījakṣaye - kaivalyam

III-51. sthānyupanimantraṇe - saṅgasmayākaraṇaṁ-punaraniṣṭaprasaṅgāt

III-52. kṣaṇatatkramayoḥ - saṁyamāt - vivekajaṁ - jñānam

III-53 जातिलक्षणदेशैः - अन्यता - अनवच्छेदात् -

तुल्ययोः - ततः - प्रतिपत्तिः ।

III-54 तारकं - सर्वविषयं - सर्वथाविषयम् -

अक्रमं चेति - विवेकजं ज्ञानम् ।

III-55 सत्त्वपुरुषयोः - शुद्धिसाम्ये - कैवल्यम् ।

III-53. jātilakṣaṇadeśaiḥ - anyatā - anavacchedāt - tulyayoḥ - tataḥ - pratipattiḥ

III-54. tārakaṁ - sarvaviṣayaṁ - sarvathāviṣayam - akramaṁ ceti - vivekajaṁ jñānam

III-55. sattvapuruṣayoḥ - śuddhisāmye - kaivalyam

IV. कैवल्यपादः

IV-1 जन्म - ओषधि - मन्त्र - तपः - समाधिजाः -

सिद्धयः ।

IV-2 जात्यन्तरपरिणामः - प्रकृत्यापूरात् ।

IV-3 निमित्तमप्रयोजकं - प्रकृतीनां -

वरणभेदस्तु - ततः - क्षेत्रिकवत् ।

IV-4 निर्माणचित्तानि - अस्मितामात्रात् ।

IV-5 प्रवृत्तिभेदे प्रयोजकं -

चित्तमेकमनेकेषाम् ।

IV-6 तत्र - ध्यानजम् - अनाशयम् ।

IV-7 कर्माशुक्लाकृष्णं - योगिनः -

त्रिविधमितरेषाम् ।

IV-8 ततः - तद्विपाकानुगुणानामेव - अभिव्यक्तिः -

वासनानाम् ।

IV. Kaivalyapādaḥ

IV-1. janma - oṣadhi - mantra - tapaḥ-samādhijāḥ-
siddhayaḥ

IV-2. jātyantarapariṇāmaḥ - prakṛtyāpūrāt

IV-3. nimittamaprayojakaṁ - prakṛtīnāṁ-
varaṇabhedastu - tataḥ - kṣetrikavat

IV-4. nirmāṇacittāni - asmitāmātrāt

IV-5. pravṛttibhede prayojakaṁ -
cittamekamanekeṣām

IV-6. tatra - dhyānajam - anāśayam

IV-7. karmāśuklākṛṣṇaṁ - yoginaḥ -
trividhamitareṣām

IV-8. tataḥ - tadvipākānuguṇānāmeva - abhivyaktiḥ-
vāsanānām

IV-9 जाति - देश - काल - व्यवहितानामपि -

आनन्तर्यं - स्मृतिसंस्कारयोः - एकरूपत्वात् ।

IV-10 तासाम् - अनादित्वं - चाऽऽशिषो - नित्यत्वात् ।

IV-11 हेतु - फल - आश्रय - आलम्बनैः -

संगृहीतत्वात् - एषामभावे - तदभावः ।

IV-12 अतीतानागतं - स्वरूपतः - अस्ति -

अध्वभेदाद्धर्माणाम् ।

IV-13 ते व्यक्तसूक्ष्माः - गुणात्मानः ।

IV-14 परिणामैकत्वात् - वस्तुतत्त्वम् ।

IV-15 वस्तुसाम्ये - चित्तभेदात् - तयोर्विभक्तः

पन्थाः ।

IV-16 न चैकचित्ततन्त्रं चेद्वस्तु -

तदप्रमाणकं - तदा किं स्यात् ।

IV-9. jāti - deśa - kāla - vyavahitānāmapi -

ānantaryaṁ - smṛtisaṁskārayoḥ - ekarūpatvāt

IV-10. tāsām - anāditvaṁ - cā''śiṣo - nityatvāt

IV-11. hetu - phala - āśraya - ālambanaiḥ -

saṅgṛhītatvāt - eṣāmabhāve - tadabhāvaḥ

IV-12. atītānāgataṁ - svarūpataḥ - asti -

adhvabhedāddharmāṇām

IV-13. te vyaktasūkṣmāḥ - guṇātmānaḥ

IV-14. pariṇāmaikatvāt - vastutattvam

IV-15. vastusāmye - cittabhedāt - tayorvibhaktaḥ

panthāḥ

IV-16. na caikacittatantraṁ cedvastu -

tadapramāṇakaṁ - tadā kiṁ syāt

IV-17 तदुपरागापेक्षित्वात् - चित्तस्य -
वस्तुज्ञाताज्ञातम् ।

IV-18 सदा ज्ञाताः - चित्तवृत्तयः - तत्प्रभोः
पुरुषस्य - अपरिणामित्वात् ।

IV-19 न तत्स्वाभासं - दृश्यत्वात् ।

IV-20 एकसमये च - उभयानवधारणम् ।

IV-21 चित्तान्तरदृश्ये - बुद्धिबुद्धेः -
अतिप्रसङ्गः - स्मृतिसंकरश्च ।

IV-22 चितेः-अप्रतिसंक्रमायाः - तदाकारापत्तौ -
स्वबुद्धिसंवेदनम् ।

IV-23 द्रष्टृदृश्योपरक्तं - चित्तं सर्वार्थम् ।

IV-24 तदसंख्येयवासनाभिः - चित्रमपि -
परार्थं - संहत्यकारित्वात् ।

IV-17. taduparāgāpekṣitvāt - cittasya -

vastujñātājñātam

IV-18. sadā jñātāḥ - cittavṛttayaḥ - tatprabhoḥ

puruṣasya - apariṇāmitvāt

IV-19. na tatsvābhāsaṁ - dṛśyatvāt

IV-20. ekasamaye ca - ubhayānavadhāraṇam

IV-21. cittāntaradṛśye - buddhibuddheḥ -

atiprasaṅgaḥ - smṛtisaṅkaraśca

IV-22. citeḥ - apratisaṅkramāyāḥ - tadākārāpattau -

svabuddhisaṁvedanam

IV-23. draṣṭṛdṛśyoparaktaṁ - cittaṁ sarvārtham

IV-24. tadasaṅkhyeyavāsanābhiḥ - citramapi -

parārthaṁ - saṁhatyakāritvāt.

IV-25 विशेषदर्शिनः - आत्मभावभावना - निवृत्तिः ।

IV-26 तदा - विवेकनिम्नं - कैवल्यप्राग्भारं
चित्तम् ।

IV-27 तच्छिद्रेषु - प्रत्ययान्तराणि - संस्कारेभ्यः ।

IV-28 हानमेषां - क्लेशवदुक्तम् ।

IV-29 प्रसंख्यानेऽप्यकुसीदस्य - सर्वथा
विवेकख्यातेः - धर्ममेघः समाधिः ।

IV-30 ततः - क्लेशकर्मनिवृत्तिः ।

IV-31 तदा - सर्वावरणमलापेतस्य - ज्ञानस्य -
आनन्त्यात् - ज्ञेयमल्पम् ।

IV-32 ततः - कृतार्थानां -
परिणामक्रमसमाप्तिर्गुणानाम् ।

IV-25. viśeṣadarśinaḥ - ātmabhāvabhāvanā - nivṛttiḥ

IV-26. tadā - vivekanimnaṁ - kaivalyaprāgbhāraṁ cittam

IV-27. tacchidreṣu - pratyayāntarāṇi - saṁskārebhyaḥ

IV-28. hānameṣām - kleśavaduktam

IV-29. prasaṅkhyāne'pyakusīdasya - sarvathā vivekakhyāteḥ - dharmameghaḥ samādhiḥ

IV-30. tataḥ - kleśakarmanivṛttiḥ

IV-31. tadā - sarvāvaraṇamalāpetasya - jñānasya - ānantyāt - jñeyamalpam

IV-32. tataḥ - kṛtārthānāṁ - pariṇāmakramasamāptirguṇānām

IV-33 क्षणप्रतियोगी - परिणामापरान्त -

निर्ग्राह्यः क्रमः ।

IV-34 पुरुषार्थशून्यानां - गुणानां प्रतिप्रसवः -

कैवल्यं - स्वरूपप्रतिष्ठा वा - चितिशक्तिरिति ।

IV-33. kṣaṇapratiyogī - pariṇāmāparānta-

nirgrāhyaḥ kramaḥ

IV-34. puruṣārthaśūnyānāṁ - guṇānāṁ pratiprasavaḥ -

kaivalyaṁ - svarūpapratiṣṭhā vā - citiśaktiriti